अनादि मानकर समाधान करने पर प्रश्न होगा कि वह अज्ञान सत्य है, अथवा नहीं? सत्य ज्ञान से अज्ञान की निवृत्ति होगी ही नहीं, अज्ञान मिथ्या होने से "मैं अज्ञ हूं" इस प्रतीति होती ही नहीं अज्ञान लक्षण ही क्या है? यदि उसे सत् असत् से विलक्षण रूप कहा जाय तोभी इष्ट सिद्धि नहीं होगी, कारण, अज्ञान;—सत् असत् से विलक्षण है, इस में कोई प्रमाण नहीं है। घट पट आदि की सत्ता, आकाश कुसुम की असत्ता, और देश काल की व्यवस्था के अनुसार

स्यैवानुभवान्नातोऽन्यत् सदसद्विलक्षणमनिर्वचनीयमज्ञानं स्वीकर्त्तुं शक्यं । यत्किञ्चिदेतत् ॥२६॥

तस्मात् पराख्या शक्तिमता भगवता निमित्तेन, प्रधानादि शक्तिमताच तेनोपादानेन सिद्धमिदं जगत् पारमार्थिकमेव । "सोऽकामयत बहुस्यां प्रजायेय," "स तपोऽतप्यत," "स तपस्तप्त्वा इदं सर्वमसृजत्, यदिदं किञ्चित् कविर्मनीषी परिभूः स्वयम्भूः, याथातथ्यतोऽर्थान् व्यदधात्, शाश्वतीभ्यः समाभ्यः" "तदात्मानं स्वयमकुरुते" त्यादि श्रवणात् । "तदेतदक्षरं नित्यं जगन्मुनिवराखिलं । आविर्भावतिरोभाव जन्मनाशविकल्पवत् ॥" इति वैष्णवात् ।

"ब्रह्म सत्यं तपः सत्यं सत्यञ्चैव प्रजापतिः ।
सत्याज्जातानि भूतानि सत्यं भूतमयं जगदिति" ।

घट का सत् असत् होना को छोड़कर तीसरी अवस्था होती ही नहीं, इस प्रकार, अज्ञान को सत् असत् के अतिरिक्त रूप अनिर्वचनीय भी नहीं माना जा सकता है ॥२६॥

तज्जन्य पराशक्ति से युक्त भगवान् निमित्त होने के कारण, प्रधानादि शक्ति युक्त भगवान् उपादान कारण होने से इस जगत् की सत्यता निर्विवाद सिद्ध है. श्रुति इस प्रकार है—"उसने इच्छा की, मैं अनेक वन जाऊँ" "उसने तपकिया,, "उसने तप के द्वारा सब कुछ उत्पन्न किया "। "कवि (ज्ञानवान्) है, मनीषी (मननशील)है, परिभू (स्वतः सिद्ध) है; और परम मङ्गल रूप अर्थों को यथायथ रूप से विधान करता है" "तव उसने अपने आप को स्वयं उत्पन्न किया" इत्यादि। विष्णु पुराण में उक्त हैं,—"हे मुनीश्वर! ये समस्त जगत् अक्षय एवं नित्य है। जन्म एवं नाश के विकल्प के

महाभारताच्च । "एक मेवाद्वितीयं ब्रह्म" त्यत्रापि वनलीन विहङ्गादि न्यायेन तदपि जगत् सत्यं सिद्धं । भ्रमवादस्तु सर्वथानुपपन्नः । "सोऽकामयत" इत्यादि श्रुति व्याकोपात् ।३०

किञ्च । क्व कस्यायं भ्रमः शुद्ध चैतन्ये जीवस्येतिचेन्न । तस्याप्रत्यक्षत्वात् । अध्यारोपे ह्यधिष्ठानसाक्षात्कारस्तन्त्रं । नच शुद्धचैतन्यं स्वस्मिन् जगद्रूपेण पश्यति । तस्य नित्य-सिद्धस्वरूपज्ञानत्वात् । किञ्च । सादृश्यावलम्बी भ्रमोऽनु-मीयते, स्थाणुः पुमानित्यादौ । तथाच भ्रमविषयाज्जगतो-ऽन्यत् पारमार्थिकं सिद्धं । अस्ति हि शुक्ति रजतादन्यत्,

---

समान उसका आविर्भाव तिरोभाव होता है"। महाभारत में उक्त है,—"ब्रह्म सत्य है, तप सत्य है, प्रजापति भी सत्य है, सत्य से सब पदार्थ उत्पन्न हुए हैं। यह भूतमय जगत् सत्य है"। श्रुति कहती है, "एक ही अद्वितीय ब्रह्म है"। यहाँपर भी वन में लीन विहङ्गम के समान. जगत्;—ब्रह्म में सत्ताके सहित लीन होने से भी जगत् की नित्यता सिद्ध होती है। और भ्रमवाद तो सर्वथा असिद्ध ही है। कारण,—"उसने इच्छा की" इत्यादि श्रुतियाँ व्यर्थ हो जायेंगी ॥३०

और भी कहना है—यह भ्रम किस का ? और कहाँ होता है ? यदि कहो कि—शुद्ध चैतन्य में जीव ब्रह्म है, ऐसा है ही नहीं। शुद्ध चैतन्य तो प्रत्यक्ष है ही नहीं, और शुद्ध चैतन्य अपने में आपको जगत् रूप में न तो देखता ही है, क्योंकि उसका नित्य सिद्ध स्वरूप ज्ञान है। और कहते हैं,—जो भी भ्रम होता है' वह समानता के आधार पर होता है, जिस प्रकार स्थाणु में मनुष्य का भ्रम होता है, उस से भ्रम के विषय से पृथक् जगत् पारमार्थिक सिद्ध होता है। जिस प्रकार शुक्ति से पृथक् बाजार में स्थित चांदी सत्य है, इस से भ्रमवाद सिद्ध नहीं होता है, तज्जन्य ईश्वर से पृथक् उसी के समान

पारमार्थिकं हृट्टस्थं तदित्यनुपपन्नस्तद्वादः। तस्मादीश्वरादन्यस्तद्वन्नित्यचेतनस्तद्दासो जीवोभवतीति सिद्धम्।३१

इति वेदान्तस्यमन्तकस्य, जीवतत्त्व निरूपणे तृतीयः किरणः।

चतुर्थ किरणः

अथ प्रकृतितत्वं निर्णीयते।

सत्वादि गुणत्रयाश्रयो द्रव्यं प्रकृतिर्नित्याच सा।
गौरनाद्यन्तवती सा जनित्री भूतभाविनी।
सितासिताच रक्ताच सर्वकामदुघा विभोरित्यादि श्रुतेः।
त्रिगुणं तज्जगद्योनिरनादि प्रभवाप्ययम्,।
अचेतनापरार्थाच नित्या सततविक्रिया,।
त्रिगुणं कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते"॥

इति स्मरणाच्च ॥१॥

नित्य चेतन उसका दास जीव होता हैं, यह सिद्ध हुआ ॥३१॥

वेदान्त स्यमन्तक के जीव निरूपण नामक तृतीय किरण की तत्त्व प्रकाश विवृति समाप्त ॥३॥

चतुर्थ किरणः

अनन्तर प्रकृति तत्त्व का निरूपण करते हैं। प्रकृति तत्त्व,-सत्त्व, रज, तम, ये तीन गुणों का आश्रय है, एवं वह नित्य है। श्रुति संवाद भी इस प्रकार हैं—वह गो है, अनादि एवं अनन्त स्वरूपा है, उत्पन्न करने वाली है, प्राणियों की रक्षा करने वाली है, उसके श्वेत,

तत्र प्रकाशादिहेतुर्गुणः सत्त्वं। राग दुःखादि हेतु रजः। प्रमादालस्यादिहेतुस्तु तमः। एषां साम्येप्रलयः, एकदेहस्थ कफ वातपित्तसाम्ये मृत्युरिव। अङ्गाङ्गिभावेन वैषम्ये तु महदादिसर्गः स्यात्। प्रलये स्वरूपः साम्यरूपः परिणामः, सर्गेतु विरूपः। स इति सततविक्रियेत्युक्तम्। प्रकृतेरस्याः प्रथमपरिणामो नात्मन्यध्यवसायहेतुः स च त्रिविधः। सात्त्विको राजसश्चैव तामसश्च त्रिधा महानिति वैष्णवाच्च ॥२॥

तस्मिन् विकारविशेषोऽहङ्कारः। आत्मनि देहाहम्भावहेतु

रक्त, कृष्ण ये तीन वर्ण हैं, भगवान् के कार्य सम्पादन करती है। स्मृतियों में लिखित है,—वह प्रकृति, जगद्योनि है, अनादि है, एवं उत्पत्ति लय का स्थान है, अचेतना है, परार्था है, अर्थात् जीव की सेवा के लिए अपनी सामग्री प्रस्तुत करती है। नित्या है, एवं निरन्तर परिणामवाली है। कर्मी जीव हैं, उनका जोत्रिगुणात्मक क्षेत्र है, उसको प्रकृति कहते हैं ॥१॥

उक्त प्रकृति में जो प्रकाशादि गुण विद्यमान है, उसे सत्त्व कहते हैं, राग दुःखादि हेतु को रजः, प्रदालस्यादि हेतु को तमः कहते हैं। सत्त्व रज तम की साम्यावस्था प्रलय है। जिस प्रकार एक देह में स्थित वात पित्त कफ की साम्यावस्था मृत्यु होती है, जिस समय उक्त गुणत्रयों में परस्पर अङ्गाङ्गि भाव से विषमता होती है, तब महदादि तत्त्वों की सृष्टि होती है। प्रलयावस्था में प्रकृति का स्वरूप साम्य रूप होता है, और सृष्टि के समय वैषम्य होता है, इससे ही यह प्रकृति निरन्तर विकृति क्रियाशीला है, इस प्रकृति के प्रथम परिणामादि के द्वारा आत्मा में अनध्यवसाय हेतु जो महत् तत्त्व उत्पन्न होता है, वह तीन प्रकार का है, विष्णु पुराण में उक्त है—महत्तत्त्व, सात्त्विक राजसिक तामसिकभेद से तीनप्रकार है ॥२॥

रिति । सच सात्विको राजस्तामसश्चेति त्रिविधः । क्रमाद्वैकारिक–तैजसभूतादिशब्दैश्चाभिधीयते । मध्यमस्तु द्वयोःप्रवर्तकतया सहकारीत्याहुः । सात्विकादहंकारादिन्द्रियाधिष्ठात्र्यी देवता मनश्च । राजसाद्बाह्येन्द्रियाणि दश । तामसात्तु तन्मात्रद्वाराकाशादीनिपञ्चेति एवमेवोक्तमेकादशे-

"ततो विकुर्वतो जातो योऽहंकारोविमोहनः
वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिवृत् ॥
तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः ।
आर्थस्तन्मात्रिकाज्जज्ञे तामसादिन्द्रियाणि च ।
तैजसाद्देवता आसन्नेकादश च वैकृतादिति ।

तामसादर्थः पञ्चभूतलक्षणः । तैजसादिन्द्रियाणिदश ।

महत्तत्त्व का विकार विशेष ही अहङ्कार है, वह आत्मा में देहाभिमान का कारण है, एवं सात्त्विक, राजस, तामस, भेद से तीन प्रकार है, इसे क्रमशः वैकारिक, तैजस, भूतादि शब्दों से कहते हैं। उन में जो मध्यम राजस है, वह सत्त्व एवं तम का प्रवर्त्तक होने से सहकारी होता है, सात्त्विक अहङ्कार से इन्द्रिय के अधिष्ठाता देवता और मन होता है, राजस से दश वहिरिन्द्रियां होती है, तामस अहङ्कार से तन्मात्राओं के द्वारा आकाशादि पञ्चमहाभूत की सृष्टि होती है। श्रीमद्भागवत के एकादश स्कन्ध में इसका विवरण है,- ,'उस विकार प्राप्त महत्तत्त्व से जीवों को मोहित कारक अहङ्कार उत्पन्न हुआ था। वैकारिक, तैजस, और तामस वृत्ति युक्त अहङ्कार ही है, तन्मात्रा, इन्द्रिय, मन का कारण जड़ चेतन ग्रन्थिमय अहङ्कार ही है। तन्मात्र से तामस अहङ्कार होता है, उस से पञ्चमहाभूत की उत्पत्ति होती है, तैजस अहङ्कार से इन्द्रियां, एवं वैकृत अहङ्कार से एकादश देवता उत्पन्न हुए हैं, पञ्चभूत की उत्पत्ति तामस से हुई

वैकृतावेकादश देवता आसन् मनश्चेत्यर्थः । तृतीये च—

"महत्तत्वाद्विकुर्वाणाद्भगवद्वीर्य चोदितात् ।
क्रियाशक्तिरहंकार त्रिविधः समपद्यत ॥
वैकारिकस्तैजसश्च तामसश्च यतोभवः ।
मनसश्चेन्द्रियाणाञ्च भूतानां महतामपीति ॥
मनसश्चेति चाद्दे्वतानां चेतिबोध्यं क्रमादितिच ॥३॥

अयमत्र निष्कर्षः । द्विविधं खल्विन्द्रियं अन्तरिन्द्रियंबहिरिन्द्रियंचेति । तत्रान्तरिन्द्रियं मनः सात्विकाहंकारोपादनकं द्रव्यं संकल्प विकल्पहेतुर्हृत्प्रदेशवृत्तिः । तदेव क्वचिदध्यवसायाभिमानचिन्तारूपकार्यभेदाद् बुद्धचहंकारचित्तसंज्ञांधत्ते

है। तैजस से दस इन्द्रियां उत्पन्न हुई। वैकृत से एकादश देवता और मन उत्पन्न हुए। श्रीमद् भागवत के तृतीय स्कन्ध में उक्त है-- भगवत् इच्छा से प्रेरित होकर महत्तत्त्व से क्रिया शक्ति रूप वैकारिक तैजस एवं तामस भेद से तीन प्रकार अहङ्कार उत्पन्न हुआ, जिस से मन, इन्द्रियां एवं पञ्चमहाभूत उत्पन्न हुए, मनसश्चेति शब्द में "च" से क्रमशः देवता का भी ग्रहण होता है ॥३॥

निष्कर्ष यह है,—इन्द्रियां दो प्रकार की हैं, अन्तरिन्द्रिय, एवं बहिरिन्द्रिय। इन में मन अन्तर इन्द्रिय है, वह सात्विक अहङ्कार से उत्पन्न होता है, वह द्रव्य है। संकल्प विकल्पात्मक है, हृदय प्रवेश की वृत्ति रूप है, अध्यवसाय, अभिमान, एवं चिन्ता रूप कार्य्य भेद से बुद्धि, अहङ्कार एवं चित्त नाम से वह ख्यात होता है, यह मन ही विषय में बद्ध होने का एकमात्र कारण है, श्रुति कहती है,—मनुष्यों का मन ही बंध, एवं मोक्ष का हेतु है, विषय के सङ्कल्प से युक्तमन अशुद्ध होता है, कामना रहित मन शुद्ध होता है, इस प्रकार स्मृति के लिए मन ही कारण है॥ राजस अहङ्कार से उत्पन्न द्रव्य रूप

इदं मनो विषयसंसर्गे बंधहेतुः । मन एव मनुष्याणां कारणं बन्धमोक्षयोः । अशुद्धं काम संकल्पं शुद्धं कामविवर्जितमिति श्रुतेः । तदित्थं स्मृत्यादिकरणमिन्द्रियं मनः सिद्धं ॥४॥

राजसाहङ्कारोपादानकं द्रव्यं बहिरिन्द्रियं । तच्चद्विविधं ज्ञानेन्द्रियं कर्मेन्द्रियभेदात् । तत्राद्यं पञ्चविधं श्रोत्रत्वक्चक्षुरसनघ्राणभेदात् । तत्र शब्दमात्रग्राहकमिन्द्रियं श्रोत्रं मनुष्यादीनां कर्णशस्कुल्यवच्छिन्नप्रदेशवृत्तिः, सर्पाणां तु चक्षुर्वृत्तिः । स्पर्शमात्रग्राहकमिन्द्रियंत्वक् सर्वशरीर वृत्तिः, नखकेशादौ प्राणमात्रतारतम्यात् स्पर्शानुपलब्धिः । रूपमात्रग्राहकमिन्द्रियं चक्षुः कृष्णताराग्रवृत्तिः । रसमात्रग्राहकमिन्द्रियं रसनं जिह्वाग्रवृत्तिः । गंधमात्रग्राहकमिन्द्रियं घ्राणं नासाग्रवृत्तिः ।५। श्रोत्रादीनां पञ्चानामाकाशादीनि पञ्चक्रमेणाप्यायकानि भवन्तीति । भौतिकत्वमेषामुपचर्यंते । एवं मनः प्राणवाचांच

वहिरिन्द्रिय समूह हैं, वह ज्ञानेन्द्रिय कर्मेन्द्रिय भेद से द्विविध है, ज्ञानेन्द्रिय,—श्रोत्र, त्वक्, चक्षु, रसन एव घ्राण भेद से पञ्चविध हैं, शब्द मात्र ग्रहण करने वाली इन्द्रिय श्रोत्र है, वह मनुष्य के कान के मध्य में रहती है, सर्प के नेत्रों में रहती है । स्पर्श मात्र ग्रहण करने वाली इन्द्रिय 'त्वक्' है, वह सर्वाङ्ग में रहती है, नख केश आदि में प्राणों के तारतम्य से स्पर्श की उपलब्धि होती है, रूपमात्र ग्रहण करने वाली इन्द्रिय नेत्र है, जो नेत्र में कृष्णतारा में पुतली के बीच रहती है । रस मात्र ग्राहक रसनेन्द्रिय है, वह जिह्वा के अग्रभाग में रहती है, गन्धमात्र को ग्रहण करने वाली इन्द्रिय घ्राण है, वह नासिका के अग्रभाग में रहती हैं ॥५॥

श्रोत्रादि ज्ञानेन्द्रिय पञ्च के आश्रय पञ्चमहाभूत क्रमशः होते

क्रमात् पृथिव्यप्तेजोभिराप्यायनात् तत्तन्मयत्वं । श्रुतिश्च-
अन्नमयं हि सौम्य मनः आपोमयः प्राण तेजोमयी वागिति ।६
अन्त्यमपि पञ्चविधं वाक्पाणिपाद पायूपस्थ भेदात् । तत्र-
वर्णोच्चारणहेतुरिन्द्रियंवाक् हृत्कण्ठादिवृत्तिः । यदुक्तं-

'अष्टौस्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।

जिह्वामूलश्चदन्ताश्चनासिकोष्ठौ च तालुचेति' ॥

वेदभाष्ये । गवादिष्वष्टाभावात् तदभावः । शिल्पादिहेतु-
रिन्द्रियं पाणिः, मनुष्यादीनामङ्गुल्यादि वृत्तिः,हस्त्यादिनां-
तु नासिकाग्रादिवृत्तिः । संचारहेतुरिन्द्रियंपादः, मनुष्यादि-
वृत्तिः उरगविहङ्गादीनामुरः पक्षादिवृत्तिः । मलादित्याग-
हेतुरिन्द्रियं पायुस्तदवयववृत्तिः । आनन्दविशेषहेतुरिन्द्रिय-

हैं, इसी से इन सबको भौतिक कहते हैं। इस प्रकार मनः, प्राण, वाणी भी क्रमशः पृथिवी, अप एवं तेज से वृद्धि प्राप्त होते हैं। इस से उनको तन्मय कहा गया है। जिस प्रकार श्रुति कहती है,—" हे सौम्य ! मन, अन्नमय, प्राण आपोमय एवं वाणी तेजोमयी हैं ।।६।।

वाक्, पाणि, पाद, वायु, एवं उपस्थ नाम से कर्मेन्द्रिय भी पाँच प्रकार होती हैं, वर्णोच्चारण के हेतु रूप इन्द्रिय वाक् इन्द्रिय हैं, जो हृदय, कण्ठ आदि में रहती है। वेद भाष्य में कहा है, वर्णों के अष्टस्थान हैं,—उर, कण्ठ, शिर, जिह्वा, मूल, दन्त, नासिका ओष्ठ और तालु है। गौ आदि के शरीर में उक्त आठ स्थानों का अभाव हेतु इस में वागेन्द्रियका अभाव है। शिल्प आदि आदि का कारण रूप जो इन्द्रिय है, वह पाणि है, वह मनुष्य के हाथों की अङ्गुलियों में एवं हाथी आदि के सूँड़ादि के अग्रभाग में रहती है। सञ्चरण का हेतु [illegible] इन्द्रिय है, जो मनुष्य आदि के पैरों में एवं सर्प पक्षी आदि की छाती और पंखों में रहती है। मल [illegible] हेतु

मुपस्थः, स च मेहनादिवृत्तिरिति ॥७॥

सात्त्विकाहंकारादिन्द्रियाधिष्ठात्र्यश्चन्द्रादयश्चतुर्दश देवता भवन्ति। तेषु चन्द्र चतुर्मुखशंकराच्युतैः क्रमात् प्रवर्तितानि मनो बुद्ध्यहंकारचित्तानि संकल्पाध्यवसायाभिमानचिन्ता प्रवर्तयन्ति। दिग्वातार्कवरुणाश्विभिः क्रमात् प्रवर्तितानि श्रोत्रत्वक्चक्षुरसनघ्राणानि शब्दस्पर्श रूपरसगंधान् प्रकाशयन्ति। अग्नीन्द्रोपेन्द्र यमप्रजापतिभिः क्रमात् प्रवर्त्तिता वाक्पाणिपादपायूपस्थावचनादानविहरणोत्सर्गानन्दाननु-भावयन्तीति ॥८॥

तामसाहंकारात्तु तन्मात्राण्यन्तरीकृत्य पञ्चभूतान्युत्पद्यन्ते। तामसाहंकारभूतवर्गयोरान्तरालिकः परिणामस्तन्मात्र शब्द

पायु इन्द्रिय है, जो उसी अङ्ग में रहती है। आनन्द विशेष का हेतु उपस्थ इन्द्रिय है, जो मेहन में (लिङ्ग में) रहती है ॥७॥

सात्त्विक अहङ्कार से इन्द्रियों के अधिष्ठाता चन्द्रमा आदि चतुर्दश देवता होते हैं, उनमें चन्द्र, चतुर्म्मुख, शङ्कर, अच्युत के द्वारा क्रमशः प्रवर्त्तित मन, बुद्धि, अहङ्कार चित्त होते हैं, उन से क्रमशः सङ्कल्प, अध्यवसाय, अभिमान, चिन्ता का प्रकाश होता है, दिक्, वायु, सूर्य्य, वरुण, एवं अश्विनी कुमारों के द्वारा क्रमसे प्रवर्त्तित जो श्रोत्र, त्वक् चक्षु, रसन, एवं घ्राण ज्ञानेन्द्रिय है, उनसे शब्द, स्पर्श, रूप, रस, गन्ध, प्रकाशित होते हैं। अग्नि, इन्द्र, उपेन्द्र, यम, एवं प्रजापति द्वारा क्रमश प्रवर्त्तित वाक् पाणि, पाद, पायु, उपस्थ, जो कर्मेन्द्रिय हैं, उनसे बोलना, ग्रहण करना, चलना, मलादित्याग करना, एवं आनन्द का अनुभव करना होता ॥८॥

तामस अहङ्कार से तन्मात्राओं को मध्य में व्यापन कर पञ्चभूत उत्पन्न होते हैं, तामस अहङ्कार और पञ्चभूत, इन दोनों के

वाच्योऽविशेषशब्देन च कथ्यते । यथा दुग्धदध्नोरांतरालिकः कललपरिणाम स्तथैव द्रष्टव्यः । भूतवर्गस्तु विशेषशब्देनोक्तः । सूक्ष्मावस्था तन्मात्राणि स्थूलावस्था तु भूतानीति ॥९॥

एतां भूतोत्पत्तिप्रक्रियां बहुधा निरूपयन्ति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत आकाशाद्वायुरित्यादि श्रुत्यर्थ-च्छायामवलम्ब्य भूताद्भूतोत्पत्तिरेके । तदाहुः किन्तदासी-दित्यादिसुबाल श्रुतिं; तस्मादहंकारात् पंचतन्मात्राणि तेभ्यो भूतानीति गोपालश्रुतिं च दृष्ट्वा केचिदेवं वदन्ति । भूतादेरहंकारात् पञ्चापि तन्मात्राण्युत्पद्यन्ते तेभ्यः क्रमात् पञ्चभूतानीति । तां ताञ्च श्रुतिं निभाल्य परन्त्वेवं वर्णयन्ति ।

मध्य में होने वाले परिणाम को तन्मात्रा कहते हैं, जिस को दोनों का विकार (कलल) कहा जाता है, वैसे ही इसे भी जानना होगा। भूत वर्ग विशेष शब्द से कहे जाते हैं। सूक्ष्म अवस्था ही तन्मात्रा है, एवं स्थूल अवस्था भूत है ॥९॥

इन भूतों की उत्पत्ति के विषय में वर्णन अनेक प्रकार है, उस आत्मा से आकाश उत्पन्न हुआ, आकाश से वायु, इत्यादि श्रुत्यर्थ का अवलम्बन कर कोई तो भूतों से भूतों की उत्पत्ति कहते हैं, कोई "यह कहो वह कैसा था" इत्यादि सुबाल श्रुति, एक "उस अहङ्कार से पञ्चतन्मात्रा और उन से पञ्चमहाभूतहुए" इस गोपाल श्रुति को देखकर ऐसा कहते हैं, तामस अहङ्कार से पञ्चतन्मात्रा होती हैं। और उनसे क्रमशः पञ्चभूत उत्पन्न होते हैं, और दूसरे कोई इन श्रुतियों को देखकर इस प्रकार वर्णन करते हैं, तामस अहङ्कार से शब्द तन्मात्रा की उत्पत्ति होती है, उस से आकाश होता है, आकाश से शब्द स्पर्श तन्मात्रा होती है उस से वायु उत्पन्न होता है । वायु से शब्द, स्पर्श, रूप तन्मात्रा होती है, उनसे तेज उत्पन्न होता है, तेज से

भूतादेः शब्दतन्मात्रं तस्मादाकाशः, आकाशात् शब्दस्पर्श-तन्मात्रं तस्माद्वायुः, वायोः शब्दस्पर्शरूप तन्मात्रं, तस्मात्तेजः तेजसः शब्दस्पर्शरूपरसतन्मात्रं, तस्मादापः, अद्भ्यो शब्द-स्पर्शरूपरसगंधतन्मात्रं, ततः पृथिवीति* ॥१०॥

एषां पञ्चानां लक्षणानि । स्पर्शवत्वेसति विशिष्टस्पर्श-शब्दाधारात्वमाकाशत्वं । विशिष्टस्पर्शवत्वेसति रूपशून्यत्वं, अनुष्णाशीतस्पर्शवत्वेसति गंधशून्यत्वं वायुत्वं । उष्णस्पर्शवत्वं भास्वररूपवत्वं वा तेजस्त्वं । शीतस्पर्शवत्वे निर्गन्धत्वेसति विशिष्टरसत्वं जलत्वं । विशिष्ट गंधवत्वं पृथिवीत्वमिति ।११

भूतानां पञ्चीकृतत्वात् शब्दादीनां सर्वत्रोपलम्भो चात्र नानुपपन्नः । पञ्चीकरणं त्वित्थं बोध्यम् । सर्वेश्वरो हरिः

शब्द, स्पर्श रूप, रस, तन्मात्रा होती हैं, उन से जल उत्पन्न होता है। जलसे शब्द स्पर्श, रूप रस गन्ध तन्मात्रा होती हैं, उस से पृथिवी उत्पन्न होती है। केचिदत्र "भूतादेः" शब्द तन्मात्रं तस्मादाकाशः, आकाशात् स्पर्श तन्मात्रं, तस्माद्वायु, वायो रूपतन्मात्रं, तस्मात्तेजः, तेजसो रसतन्मात्रं तस्मादापः, अद्भ्योगन्धतन्मात्रं ततः पृथिवीति मन्यन्ते ॥१०॥

इन पञ्चभूतों के लक्षण समूह इस प्रकार हैं—स्पर्शयुक्त होकर एक विशेष स्पर्श एवं शब्द का आधार आकाश है, विशेष स्पर्श युक्त होकर रूप शून्य होना, एवं अनुष्णाशीत स्पर्श युक्त होकर गन्ध रहित होना वायु है, उष्ण स्पर्श युक्त होकर, अथवा प्रकाश पदार्थ ही तेज है, शीत स्पर्श युक्त गन्ध रहित होकर जो विशेष रस युक्त है वह जल है, और विशेष गन्धयुक्त होना ही पृथिवी है ॥११॥

पञ्चीकृत पञ्चभूत होने से शब्द आदि [illegible] होती है [illegible] नहीं [illegible]

पञ्चापि भूतानि सृष्ट्वा तानि प्रत्येकं द्विधा समं विभज्य तयोः पञ्चकयोरेकं प्रत्येकं चातुर्विध्येन समं विभज्य तेषां चतुर्णां भागान् स्व स्व स्थूलभागत्यागेनान्यस्मिन् योजनमिति। यदुक्तं— "विभज्य द्विधापञ्चभूतानि देव

स्तदर्धानि पश्चाद्द्विभागानि कृत्वा ॥

तदन्येषुमुख्येषु तं तं नियुञ्जन्,

स पञ्चीकृतिं पश्यतिस्मेति ॥१२॥

एभ्यः पञ्चीकृतेभ्यो भूतेभ्यश्चतुर्दश लोकखचितान्याण्डानि सन्तीति। तेषु भूर्भुवः स्वः महर्जनस्तपः सत्याभिधाः सप्त-लोकाः उपर्य्युपरि सन्ति। अतलवितल सुतलरसातलतलातल महातलपातालाख्याः सप्तत्वबोधः सन्तीति। तेभ्य एव जरायुजाण्डजस्वेदजोद्भिज्जानिचतुर्विधानि शरीराणि ब्रह्माण्डान्तर्वर्तिनां जीवानामुत्पद्यन्ते। तेषु मनुष्यपश्वादीनि

प्रक्रिया इस प्रकार है,—सर्वेश्वर हरि—पञ्चभूतों की सृष्टि करके उन में से प्रत्येक के समान रूप दो दो भाग किए, पुनर्वार एक एक अर्द्ध भाग को चार भागों से विभक्त किए, अनन्तर अपने अपने स्थूल भाग को छोड़कर चार भागों को दूसरे में मिलाने से पञ्चीकृत हुआ कथित है—भगवान् पञ्चभूतों को दो भाग करके, पश्चात् उस के अर्द्ध भाग को विभक्त कर दूसरे तत्त्वों में मिलाकर देखने लगे ॥१२॥

इन पञ्चीकृत भूतसमूह से चतुर्दशलोक युक्त ब्रह्माण्ड समूह उत्पन्न होते हैं, उनमें भूः, भुवः, स्वः, महः, जनः, तपः, सत्यः, ये क्रमशः ऊपर के लोक होते हैं। अतल, वितल, सुतल, रसातल, तलातल, महातल पातालनामके सात लोक नीचे के होते हैं। इन ब्रह्माण्डान्तर्गत जीवों के जरायुज, अण्डज, स्वेदज और उद्भिज्ज ये चार प्रकार के शरीर उन्हीं पञ्चीकृत महाभूतों से उत्पन्न होते हैं। मनु-

जरायुजानि, पक्षिपन्नगादीनि अण्डजानि, यूकमशकादीनि स्वेदजानि तरुगुल्मादीनि उद्भिज्जानीति ॥१३॥

इह दिक् पृथक् द्रव्यं न कल्प्यते। सूर्य्यपरिस्पन्दनादिना आकाशस्यैव प्राच्यादिरूपतासिद्धेः। दिक् सृष्टिस्त्वन्तरिक्षादि सृष्टिवत् सिध्यति ॥१४॥

प्राणो न पृथक् तत्वं। अवस्थान्तरापन्नस्य वायोरेवतत्वेन सिद्धेः। स पञ्चविधः प्राणापानसमानोदानव्यानभेदात् ॥ महदादीनि पृथिव्यन्तानि तत्वानि समष्टिस्तेष्वेकदेशोपादानेन क्रियमाणानि कार्य्याणि तु व्यष्टिरुच्यते ॥१५॥

अपरे तु अष्टौ प्रकृतयः षोड़शविकारा इति। श्रुत्यनुसारेण भूतादेः शब्दतन्मात्रं तस्मादाकाशः, स्पर्शतन्मात्रं, चोत्पद्यते, स्पर्शतन्मात्राद्वायुः रूपतन्मात्रं च, रूप तन्मात्रात्तेजो, रस-

---

में मनुष्य, पशु आदि जरायुज हैं। पक्षी, सर्प आदि अण्डज हैं, जोंक मच्छर प्रभृति स्वेदजहैं,एवं वृक्ष, लता आदि वृश्चिक उद्भिज्जहैं।१३

यहांपर दिक् को पृथक् द्रव्य मानना उचित् नहीं है, सूर्य की गति के अनुसार आकाश को ही पूर्व दिक् रूपसे कहा जाता है, शास्त्रों में दिक् की जो सृष्टि कही गई है, उसकी अन्तरिक्ष सृष्टि के समान जानना होगा ॥१४॥

प्राण भी पृथक् तत्व नहीं है, अवस्थान्तरापन्न वायु की ही अवस्था विशेष है। यह प्राण, अपान, समान, उदान, व्यान भेद से पांच प्रकार हैं। महत्तत्व से आरम्भ कर पृथिवी पर्य्यन्त तत्व समूह को समष्टि कहते हैं, उसमें एकदेश व्यापी जो कार्य्य होता है उसे व्यष्टि कहते हैं ॥१५॥

अपर व्यक्तिगण कहते हैं—श्रुति के अनुसार अष्ट प्रकार प्रकृति एवं सोलह विकार है। पञ्चभूतों की शब्द तन्मात्रा से

तन्मात्रञ्च, रसतन्मात्रादापोगन्धतन्मात्रञ्च, सहैवोत्पद्यते, गन्धतन्मात्राद्भूमिरितिवर्णयन्ति । एवमाकाशादिषु पञ्चसु शब्दस्पर्शरूपरसगन्धाः । पञ्चगुणा यथोत्तरमेकैकाऽधिक्येन व्यज्यन्ते ॥ तत्राकाशे शब्द एकः, वायोशब्द स्पर्शौ द्वौ, तेजसि रूपान्तास्त्रयः, अप्सुरसान्ताश्चत्वारः, पृथिव्यांतु गन्धान्ताः पञ्चेति । इह तन्मात्राणां विषयाणां समाननामत्व-श्रवणादभेदो न शक्यः । पूर्व्वेषां भूतकारणत्वेन परेषां भूत-धर्मत्वेन भेदात् । तदित्थं प्रकृतिमहदहङ्कारैकादशेन्द्रिय-तन्मात्रपञ्चक पञ्चभूत भेदेन चतुर्विंशति तत्वानि वर्णितानि ।१६

एषु प्रकृत्यादित्रिकंभूतपञ्चकञ्च स्थूलदेहस्योपादानं । इन्द्रियानि तु भूषणार्पितरत्नानीव तदाक्रम्य तिष्ठन्ति । पञ्च-

---

आकाश, और स्पर्श तन्मात्रा होती है। उस से वायु एवं रूप तन्मात्रा उत्पन्न होती है। रूप तन्मात्रा से तेज और रस तन्मात्रा उत्पन्न होती है, रसतन्मात्रा से जल और गन्ध तन्मात्रा उत्पन्न होती है, एवं गन्ध तन्मात्रा से पृथिवी उत्पन्न होती है, इन आकाशादि पञ्च महाभूतों में शब्द, स्पर्श, रूप, रस एवं गन्ध ये पांच गुण एकसे दूसरे में अधिक प्रकट होते हैं, जैसे कि आकाश में एक शब्द गुण होता है, वायु में शब्द स्पर्श दो हैं, तेज में शब्द स्पर्श रूप ये तीन हैं जल में शब्द, स्पर्श, रूप, रस, चार है। पृथिवीमें-शब्द स्पर्श रूप रस गन्ध, ये पांच है। यहांपर तन्मात्रा और विषय, यह सब के नाम सुनकर इन में अभेद बुद्धि नहीं करनी चाहिये। क्योंकि—प्रथम भूत समूह कारण हैं, अनन्तर भूत समूह धर्म हैं, अतः उभय में भेद सुस्पष्टहै। इस प्रकार प्रकृति, महत्तत्त्व, अहङ्कार एकादश इन्द्रियां पञ्चतन्मात्रा एवं पञ्च महाभूत ये चतुर्विंशति तत्त्व वर्णन किए गए हैं ॥१६॥

मनीषिगण कहते हैं—इन में प्रकृति आदि और पञ्चमहाभूत

तन्मात्राण्येकादशेन्द्रियाणि प्राणश्च सूक्ष्मदेहस्योपादानमिति व्याख्यातारः ॥१७॥

शरीरत्वं हि चेतनं प्रति नियमेनाधेयत्वं विधेयत्वं शेषत्वञ्च। भोगायतनं चेष्टाश्रयो वा शरीरमित्यादि लक्षणन्तु दुष्ट पत्नी शरीरादावतिव्याप्तेः। इह प्रकृत्यादेरुत्पद्यमानं महदादि न द्रव्यान्तरं। न हि मृत्पिण्डादुत्पद्यमानं घटादिकमर्थान्तरमुपलभ्यते किं त्ववस्थान्तरमेव तत्रोत्पद्यते, तावतैव नाम संख्या व्यवहारादिभेदसिद्धिः। नान्यथा सेनावनराश्यादिव्यवहारः सिध्येत्। तस्मादेकस्मिन् द्रव्ये कारणकार्ये द्वे अवस्थे ते च मिथो भिन्ने द्रव्यस्त्वभिन्नं भवतः। तन्तुपटात्मकं मिथो भिन्नं द्रव्यमिति तार्किका मन्यन्ते तन्न, अनुपलम्भादनुमान वैगुण्यापत्तेश्च। भेदाभेदमिति सांख्याः प्राहुः। तन्न,

---

ये स्थूल देह के उपादान कारण है, और देह में इन्द्रियां रत्नादि अलङ्कार के समान हैं, पञ्चतन्मात्रा एकादश इन्द्रिय, और पञ्चप्राण, ये समूह देह के उपादान कारण हैं ॥१७॥

शरीरत्व ही चेतन के प्रति नियम से आधेय, विधेय एवं शेष है, भोग का आयतन, या चेष्टा का आश्रय शरीर का लक्षण करना ठीक नहीं है, क्योंकि,—पत्नी के शरीर आदि में इसकी अतिव्याप्ति हो जायेगी। यहां प्रकृति आदि से उत्पन्न महत्तत्त्व आदि पृथक् द्रव्य नहीं है, मृत्तिका से उत्पन्न घट आदि पृथक् वस्तु नहीं प्रतीति होती हैं, वह तो उसी के अवस्थान्तर मात्र है, इसी से नाम, संख्या आदि भेद व्यवहार होता है, अन्यथा सेना, धन सेनावनराशि आदि व्यवहार सिद्ध नहीं हो सकता। इस लिए एक ही द्रव्य में कारण और कार्य ये दो अवस्थायें होती है, तार्किक मत में कार्य कारण दोनों भिन्न है, यह ठीक नहीं है, क्योंकि इस के उपलब्धि विरोध परिमाण में

विरोधात् । तस्मादभिन्नमेव कारणात्कार्य्यमिति ॥१८॥

इति वेदान्तस्यमन्तके प्रकृतितत्वनिर्णय श्चतुर्थः किरणः ।

❀ पञ्चमः किरणः ❀

अथ कालतत्वनिरूपणम् ॥ त्रैगुण्यो शून्यो जड़ो द्रव्य-विशेषः कालः । स हि भूतभविष्यद्वर्त्तमानयुगपच्चिर क्षिप्रादिव्यवहारस्य सर्गप्रलययोश्च हेतुः क्षणादिपरार्द्धान्त-श्चक्रवत्परिवर्त्तमानो वर्णयते । तत् सिद्धिस्तु ज्ञः कालकालो गुणी सर्वविद् यः ।

योऽयं कालस्तस्य तेऽव्यक्तबन्धो श्चेष्टामाहु श्चेष्टते येन विश्वं ।
निमेषादिर्वत्सरान्तो महीयांस्तन्त्वेशानं क्षेमधाम प्रपद्ये ॥

द्विगुण दोष हो जाता है, सांख्यवादिगण, कार्य कारण में भेदाभेद बताते हैं, सो ठीक नहीं है; क्योंकि दोनों में विरोध है । अतः कारण से कार्य अभिन्न है ॥१८॥

वेदान्त स्यमन्तक के प्रकृतितत्त्व निरूपण नामक
चतुर्थ क्रिरण की विवृत्ति समाप्त ॥४॥

❀ पञ्चमः किरणः ❀

अनन्तर कालतत्त्व का निरूपण करते हैं, सत्त्वरजस्तम गुण त्रय शुन्य जड़ द्रव्य विशेष को काल कहते हैं। यह भूत, भविष्यत्, वर्तमान् युगपत्, चिर, क्षिप्र, आदि व्यवहार का एवं सृष्टि प्रलय का भी हेतु है, वह क्षण से लेकर परार्द्ध पर्य्यन्त चक्र के समान निरन्तर घूमता रहता है। शास्त्र में इसका वर्णन है। श्रुति में उक्त है,- वह ज्ञाता है, और काल का काल है, गुणी है, एवं सर्व विद्याओं से

कालचक्रं जगच्चक्रमित्यादि श्रुतिः स्मृतिश्च। नित्यो- विभुश्चैषः सदेव सोऽस्येदमग्र आसीदित्यादिषु सर्गात् प्रागपि तस्य सत्वावगमात्। सर्व्वत्र कार्य्योपलम्भाच्च यदुक्तं। न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासत इति ॥ सर्व नियामकोऽप्ययं परमात्मना नियम्यो भवति। ज्ञः काल इति श्रवणात् तस्य चेष्टात्वस्मरणाच्च। अत स्तन्नित्यविभूतौ नास्य प्रभावः। न यत्र कालो जगतां परः प्रभुः, कुतोऽनु देवा जगता च ईशिरे इत्यादि स्मृतेः ॥१॥

इति वेदान्तस्यमन्तकेकालतत्वनिर्णयः पञ्चमः किरणः।

युक्त है: श्रीमद्भागवत में लिखित है, हे विश्वबन्धो ! यह जो काल है, जिस से यह विश्व नियन्त्रित होता है, जो निमेष से लेकर महावत्सर पर्य्यन्त है, वह काल आपकी ही चेष्टा है, ज्ञानीलोक ऐसा कहते हैं। हम उन्हीं मङ्गल भवन ईश्वर की शरण लेते हैं। "काल चक्रं, जगच्चक्रं" इत्यादि श्रुति में वर्णित है। यह काल नित्य एवं विभु है, श्रुति में लिखा है—हे सौम्य ! "इस विश्व सृष्टि से पहले एक सत् ही था," इस से सृष्टि के पूर्व भी काल की सत्ता मिलती है; सभी कार्यों में काल का अस्तित्व उपलब्ध होता है, जैसा कि लिखा है,—"जगत् में ऐसी कोई प्रतीति नहीं है, जिस मैं काल का मान न हो"। यह काल सबका नियामक है, एवं परमात्मा के द्वारा इसका नियमन होता है, जैसा कि पहले कहा गया है, वह ज्ञाता है, काल का काल है, काल उनकी चेष्टा है। अत: भगवान् की नित्य विभूति में इस काल का प्रभाव नहीं है। स्मृति में लिखा है—जगत् का श्रेष्ठ नियामक काल, वहाँपर नहीं है" ॥१॥

वेदान्त स्यमन्तक के कालतत्व निरुपण नामक
पञ्चम किरण की विवृत्ति समाप्त ॥५॥

❀ षष्ठः किरणः ❀

अथ कर्म्म निरूप्यते । तच्च क्रियारूपं, कृतिसाध्यमपि कृतिमदनादिसिद्धम्, बीजाङ्कुरादिवदनादिसिद्धमुक्तम् । "न कर्म्माविभागादिति चेन्न, अनादित्वादिति" । तत् खल्व शुभंशुभञ्चेति द्विभेदं । वेदेन निषिद्धं नरकाद्यनिष्टसाधनं ब्राह्मणहननाद्यशुभं, तेन विहितं काम्यादि तु शुभं । तत्र स्वर्गादीष्टसाधनं ज्योतिष्टोमादि काम्यं । प्रकृते प्रत्यवायजनकं सन्ध्योपासनाऽग्निहोत्रादि नित्यं । पुत्रजन्माद्यनुबन्धि जातेष्ट्याादिनैमित्तिकं । दुरितक्षयकरचान्द्रायणादिप्रायश्चित्त मिति शुभं बहुविधं । एषु निषिद्धमिव काम्यञ्च मुमुक्षोर्हेयमेव मुक्तिप्रतिबन्धिफलत्वात्! नित्यादिकन्तु चित्तशुद्धिकरत्वात् तेनानुष्ठेयमेव ॥१॥

अनन्तर कर्म का निरूपण करते हैं,—वह क्रियारूप है, एवं कृति साध्य होकर भी कृतिमदनादिसिद्ध बीजाङ्कुर के समान अनादिसिद्ध है। वेदान्तसूत्र में कथित है,—"न कर्माविगादितिचेन्न, अनादित्वात्, कर्मका विभाग नहीं है. ऐसा कहना ठीक नहीं है, कर्म अनादि है, कर्म शुभ अशुभ भेद से द्विविध है, वेद विहित काम्यादि कर्म शुभहै, वेद निषिद्ध,नरकादि अनिष्टों का साधन ब्राह्मण बध आदि अशुभ है। इन में स्वर्गादि इष्ट का साधन,—काम्य कर्म है, जिसके न करने पर प्रत्यवाय होता है, इस प्रकार सन्ध्योपासन अग्निहोत्रादि कर्म को नित्य कहते हैं। पुत्रजन्म के उपलक्ष्य में जो जातेष्ट्यादि कर्म होते हैं, वे नैमित्तिक हैं, पापक्षय हेतु चान्द्रायण आदि जो प्रायश्चित्त रूप शुभकर्म है, वे अनेक प्रकार होते हैं। इन में निषिद्ध कर्म के समान काम्य कर्म भी मुमुक्ष के लिये हेय है, कारण कि-मुक्ति

किञ्च, ज्ञानोदयात् पूर्वं यत् सञ्चितं तत् शुभमशुभञ्च ज्ञानेन विनश्यति। ततः परं क्रियमाणं यत् न तेन विद्वान् विलिप्यते। तथा—यद्यथेषीकातुलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वं पाप्मानः प्रदूयन्त इति। यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवात्मविदि पापं कर्म न श्लिष्यत इति च छान्दोग्य श्रुतिः। अत्र सञ्चित क्रियमाणयोः पापयो र्विनाश विश्लेषा वुक्तौ। "उ भे उ है वैष एते तरत्यमृतः साध्वसाधुनी' इति वृहदारण्यक श्रुति। अत्र तयोः पाप पुण्ययो स्तौ दर्शितौ उभे सञ्चितक्रियमाणे साध्वसाधुनी पुण्यपापे एव विद्वान् तरत्युल्लंघयति सञ्चितयोर्विनाशः। क्रियमाणयोस्त्वश्लेष इत्यर्थः ॥२॥

में ये सब बाधक हैं, और नित्य कर्म चित्त शुद्ध करने वाले होते हैं, अतः ये अनुष्ठान योग्य हैं ॥१॥

और भी आत्म विषयक ज्ञानोदय होने के पूर्व जो भी शुभ अशुभ कर्म सञ्चित है, वे सब ज्ञान से नष्ट हो जाते हैं, इसके पश्चात् जो क्रियमाण कर्म है, उनसे ज्ञानि व्यक्ति लिप्त नहीं होते हैं। जिस प्रकार रुई अग्नि से दग्ध हो जाती है, उस प्रकार ज्ञानी के समस्त पाप विनष्ट हो जाते हैं। जिस प्रकार कमल के पत्ते में जल स्पर्श के बिना रहता है, उस प्रकार ज्ञानी व्यक्ति को पाप कर्म स्पर्श नहीं करता है, छान्दोग्योपनिषत् में लिखित है। इन श्रुतियों में सञ्चित एवं क्रियमाण—दोनों प्रकार के पापों का विनाश एवं विश्लेष कहा गया है। वृहदारण्यक श्रुति में उक्त है, वह ज्ञानी पुरुष साधु असाधु दोनों प्रकार कर्म को तर जाता है। इस श्रुति में सञ्चित, क्रियमाण, इन दोनों प्रकार के पाप पुण्यों को विनाश कहा गया है; अर्थात् सञ्चित का विनाश एवं क्रियमाण का विश्लेष कहा गया है ॥२॥

इत्थं ज्ञानेनैव विनिवृत्तकर्ममलस्तेनैव हरिपदं प्राप्याक्षय-सुखभाक् तत्रैव निवसति ततः पुन र्न निवर्तते । "ब्रह्म विदाप्नोति परं" "तमेव विदित्वा अति मृत्युमेति नान्य पन्था विद्यते अयनाय" "सोऽश्नुते सर्वान् कामान्" "न स-पुनरावर्तते" इति श्रवणात् ॥३॥

तच्च ज्ञानं द्विविधं-परोक्षमपरोक्षञ्च । परोक्षं शब्दं, अपरोक्षन्तु ह्लादिनी सारसमवेतसम्विद्रूपम् । तच्च भक्तिशब्द व्यपदेश्यं दृष्टं । विज्ञानघनानन्दघन सच्चिदानन्दैकरसे भक्ति-योगे स तिष्ठतीति गोपालोपनिषदि । तत्र पूर्वं परम्परया परन्तु साक्षाद्ब्रह्मप्रापकं बोध्यं । केचित्तु महत्तमप्रसङ्गलब्धेन शुद्धभक्तियोगरूपेण श्रवणकीर्तनादिकर्मणैव चित्तशुद्धिं हरि

इस प्रकार ज्ञान से ही कर्म मल विनष्ट होता है, उसी से हरि पद की प्राप्ति होती है, और अक्षय सुख का अधिकारी बनकर जीव वहीं निवास करता है। वहाँ से पुनर्वार आगमन नहीं होता है। जिस प्रकार श्रुति में वर्णित है,—ब्रह्मज्ञ व्यक्ति ही ब्रह्म पद को प्राप्त करता है, उसको जानकर ही मृत्यु से पार होता है, इस के अतिरिक्त परम पद की प्राप्त होने का अपर कोई मार्ग नहीं है, वह पुनरावर्त्तन नहीं करता है ॥३॥

उक्त ज्ञान द्विविध है,—परोक्ष एवं अपरोक्ष, शब्द द्वारा परोक्ष ज्ञान होता है, और अपरोक्ष ज्ञान ह्लादिनी शक्ति के सार युक्त सम्बित् रूप है, शास्त्र में जो भक्ति शब्द से उक्त है। गोपालो-पनिषद् में लिखित है। विज्ञानघनानन्द घन, सच्चिदानन्द के रस भक्ति योग में स्थित है, इस में प्रथम परोक्ष ज्ञान परम्परा रूप से भूत वा अपरोक्ष ज्ञान साक्षात् रूप से ब्रह्म प्राप्तिका कारण है, कुछ व्यक्ति महत् पुरुषों के सङ्ग से प्राप्त शुद्ध भक्ति योग रूप श्रवण

पदंच लभन्ते इति दृष्टम् ।

"पिबन्ति ये भगवत आत्मनः सतां,
कथामृतं श्रवण पुटेषु संभृतम् ।
पुनन्ति ते विषयविदूषिताशयं,
व्रजन्ति तच्चरण सरोरुहान्तिकमित्यादिषु ।४

तदित्थं तत्वपञ्चकं विस्तृतं, श्रीवैष्णवे चोक्तमेतत् ।
विष्णोः स्वरूपात् परतो हि तेऽन्ये, रूपे प्रधानं पुरुषञ्च विप्र !
तस्यैव तेऽन्येन धृते वियुक्ते, रूपेण यत्तत् द्विजकालसंज्ञं ॥
जनैश्च कर्मस्तिमितात्मनिश्चयै रित्यादिना ।
तदेवमेतत् पञ्चकविवेकी वर्णितसाधनसम्पत्तिमान् विशुद्धः,
श्रीहरिपदमुपलभ्य तत्रैव सर्वदा दिव्यति इति ॥५॥

कीर्त्तनादि कर्म के द्वारा ही चित्तशुद्धि एवं श्रीहरि के चरणों की प्राप्ति मानते हैं। श्रीमद्भागवत में लिखित है, जो व्यक्ति अपने कर्ण पुटों से साधु पुरुषों की आत्मा श्रीभगवान् की कथा रूपी अमृत का पान करता है, उनके विषयों से दूषित अन्तःकरण पवित्र हो जाता है, और वह श्रीभगवच्चरणार विन्दों के समीप पहूँच जाता है ॥४॥

श्रीविष्णु पुराण में तत्त्व पञ्चक का विवरण लिखित है, "हे विप्र ! प्रधान पुरुष, प्रकृति जीव, यह दोनों निरुपाधि विष्णु रूप से भिन्न हैं," हे विप्र ! जिस रूप के द्वारा सृष्टि के समय वे दोनों संयुक्त होते हैं, प्रलय के समय वियुक्त भी होते हैं, वह श्रीविष्णु का काल नामक रूप है। जिनका आत्म निर्णय कर्म के द्वारा स्तिमित हो गया है" इत्यादि"। इस ग्रन्थ में बर्णित तत्त्व पञ्चक के विवेकी व्यक्ति, उक्त साधन सम्पत्ति युक्त होनेपर मुक्त होकर श्रीहरिपद को प्राप्त कर श्रीहरि के सान्निध्य में सदा रहता है ॥५॥

नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥६॥

राधादि दामोदर नाम बिभ्रता,
विप्रेण वेदान्तमयः स्यमन्तकः ।
श्रीराधिकायै विनवेदितो मया,
तस्याः प्रमोदं स तनोतु सर्वदा ॥७॥

इति वेदान्तस्यमन्तके कर्मतत्वनिर्णयः षष्ठः किरणः ।

※ समाप्तश्चायं ग्रन्थः ※

श्रीचैतन्यात्मा मुरारि मेरे हृदय में सर्वदा विराजित हों, जिनकी अनुकम्पा से गजराज एवं गजपति श्रीप्रतापरुद्र अनवद्य आनन्द पूर्ण हुए थे । श्रीराधादामोदर नामक विप्रने वेदान्ततत्त्वपूर्ण स्यमन्तक नामकग्रन्थ रचना कर श्रीराधिका को समर्पण किया, इससे श्रीराधिका की प्रसन्नता नित्य होगी ।

इति वेदान्तस्यमन्तक में कर्मतत्त्व निर्णय नामक
षष्ठ किरण समाप्त हुआ ॥

हरिदासेति विप्रेण वृन्दारण्य निवासिना
ग्रन्थस्यमन्तकस्येयं विवृतीरचितामुदा ॥

"अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥
संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥"

स्वजातीय क्षुद्र होने पर भी उसका परस्पर सम्मिलन कार्य्यकर होता है । कारण तण्डुल तुष परित्यक्त होकर अङ्कुरोत्पादनक्षम नहीं होता है ।

"संहति" नीति शाश्वती है, किन्तु अशिक्षा, कुशिक्षा, दलीय शिक्षा ही एकता का विघटक है, इस से भोगेच्छा, सुखलिप्सा, अर्थाकाङ्क्षा, पदलोलुपता की वृद्धि होकर सामाजिक शान्ति विदूरित होती है ।

सुख-शान्ति समृद्ध समाज गठन के उद्देश्य से आविष्कृत महर्षि श्रीकृष्णद्वैपायन की स्वानुभूत वास्तव प्रचेष्टा ही असमोर्द्ध है ।

इसमें एक ही प्रमाण, एक साध्य, एक साधन, एक उपास्य एक आदर्श है । मानव मात्र ही इसमें अधिकारी है ।

वेद एवं वेदानुगत निखिल शास्त्रों का सार निर्णय एवं बुद्धि-शुद्धि का कारण निर्णय निबन्धन श्रीमद्भागवत का प्रणयन महर्षि वेदव्यास के द्वारा हुआ है ।

जिस में व्रज सीमन्तिनीगण ही आदर्शाग्रणी, परम पुरुषार्थ अनन्य ममता ही प्रयोजन, भक्ति ही परम साधन, परमानन्दकन्द सर्वाश्रय सुशील श्रीकृष्ण ही उपास्यतत्त्व, एवं श्रीमद्भागवत ही एकमात्र प्रमाण,—उद्घोषित है ।

श्रीवृन्दावनस्थ श्रीजीवगोस्वामिकृत "भागवत सन्दर्भ" (षट्सन्दर्भ) उक्त दुर्द्धर्ष श्रीमद्भागवत ग्रन्थ का ही निरवद्य भाष्य है । तत्त्व, भगवत्, परमात्म, कृष्ण, भक्ति, प्रीति नामक सन्दर्भ के द्वारा महर्षि श्रीव्यासदेव के अभीप्सित तत्त्वों का सरस विश्लेषण इसमें है ।

१ । तत्त्व सन्दर्भ में—एक अद्वय तत्त्व 'सत्य' का ही प्रतिपादन, "ब्रह्म, परमात्मा, भगवान्" रूप में उक्त तत्त्व की अभिव्यक्ति, दृष्टि तारतम्य से ही होती है, वस्तुमें तारतम्य नहीं है । पुराणों का वेदत्व प्रतिपादन, श्रीमद्भागवत का सर्वप्रमाण चक्रवर्त्तित्व, जीव स्वरूप निरूपण, रसस्वरूप श्रीमद्भागवतस्थ अक्षरों का अहेयत्व प्रतिपादन ।

२। भगवत् सन्दर्भ में—आदर्श सशक्तिक परतत्त्व का प्रदर्शन, उपासक दृष्टि से परतत्त्व का आविर्भाव, बैकुण्ठ निरूपण, विशुद्ध सत्त्व निरूपण, स्वरूप शक्ति, अचिन्त्य शक्ति, अन्तरङ्गादि शक्ति वर्णन। माया शक्ति का निर्णय। श्रीविग्रह का पूर्णस्वरूपत्व, अवतार तारतम्य, सर्ववेदाभिधेयत्व, श्रुतिस्तुति सङ्गति, सर्वप्रकरण संग्रहादि।

३। परमात्म सन्दर्भ में—परमात्मा, भेद, गुणावतार तारतम्य, जीव, माया, जगत्, परिणाम स्थापन, विवर्त्त समाधान, जगत् के सहित परमात्मा की अनन्यता, जगत् की सत्यता, निर्गुण का समाधान, जगत् शिक्षा हेतु भक्त-भगवान् का जगत् में आगमन। षड़् विध लिङ्ग के द्वारा भगवान् में तात्पर्य्य निर्णय प्रभृति।

४। श्रीकृष्ण सन्दर्भ में—श्रीकृष्ण की स्वयं भगवत्ता, अंश बोधक वाक्यों का समाधान, पूर्णत्व प्रदर्शन। श्रीधरस्वामी की सम्मति, मतान्तर का निरसन। सर्वशास्त्र समन्वय, श्रीभगवन्नाम महिमादि।

५। भक्ति सन्दर्भ में—उत्तमा भक्ति की साधनता। निखिल प्रसङ्गों के द्वारा प्रतिपादन, वर्णाश्रमधर्म, ज्ञान साधन, कर्म समर्पण, जीवन्मुक्ति में भक्ति, सर्वफलप्रदायित्व, अधिकारि भेद, निष्काम धर्म, सत्प्रसङ्ग, भगवत् उन्मुखता में हेतु। महाभागवत् प्रसङ्ग, परिचर्य्या वैष्णवों की परिचर्य्या, श्रवणादि नवधा भक्ति, गुरु वरण, अहंग्रहोपासना, भक्त लक्षण, वैधी भक्ति, शरणागति, श्रीगुरु सेवा, श्रीकृष्ण का भजन वैशिष्ट्य प्रभृति।

६। प्रीति सन्दर्भ में—श्रीभगवत्प्रीति का सर्व पुरुषार्थ निर्णय, मुक्ति, प्रभृति का विवेचन, सद्योमुक्ति क्रम, जीवन्मुक्ति, सालोक्यादि मुक्ति, भगवद्भक्त ही मुक्त, भगवत् प्रीति का स्वरूपलक्षण तटस्थ-लक्षण। प्रीति भेद, अभिमान भेद, ऐश्वर्य्य माधुर्य्य का तारतम्य, गोकुलवासियों का तारतम्य, श्रीराधा का श्रेष्ठत्व।

श्रीभगवत् प्रीति का रसत्व प्रतिपादन। अनुकार्यगत रस, लौकिक रस से विलक्षणता, सन्देह निरसन, विभावादि का प्रदर्शन, गुणादि का कथन, ऐश्वर्य्य माधुर्य्य, पञ्चविध रस का वर्णन, गौण रस, रसाभास, शान्तादि रस, उज्ज्वल रस, प्रतिपक्ष, आलम्बनादि, पूर्वरागादि विप्रलम्भ, सम्भोग, मान, प्रेमवैचित्त्य, प्रवास, सम्भोगभेद, श्रीराधा की महिमा प्रभृति।

भागवत सन्दर्भ के अध्ययन से मानवमन जीव मात्र के प्रति ममत्व स्थापन में सद्य उत्साही होता है।

"श्रीचैतन्यमतानुगा बहुविधैस्तत्त्वैः समुद्भासिता।
सद्भक्तिप्रतिपालनी सुवचसा प्रेमार्थसंस्थापिका ॥
जीवातु र्हरिभक्तजीवनिचये चित्तश्रुतिप्रीतिदा।
श्रीजीव प्रतिभा जगद्विजयिनी सर्वैर्धिया धार्य्यताम् ॥

हरिदासशास्त्री

श्रीगदाधरगौरहरि प्रेस, कालीदह, वृन्दावन।

श्रीहरिदास शास्त्री सम्पादिता सद्ग्रन्थावली

क्रम. सद्ग्रन्थ	मूल्य
१-वेदान्तदर्शनम् भागवतभाष्योपेतम्	१५०.००
२-श्रीनृसिंह चतुर्दशी	१०.००
३-श्रीसाधनामृतचन्द्रिका	२०.००
४-श्रीगौरगोविन्दार्चनपद्धतिः	२०.००
५-श्रीराधाकृष्णार्चनदीपिका	२०.००
६-७-८-श्रीगोविन्दलीलामृतम्	४५०.००
९-ऐश्वर्यकादम्बिनी	३०.००
१०-श्रीसंकल्पकल्पद्रुम	३०.००
११-१२-चतुःश्लोकीभाष्यम्, श्रीकृष्णभजनामृत	३०.००
१३-प्रेमसम्पुट	४०.००
१४-श्रीभगवद्भक्तिसार समुच्चय	३०.००
१५-ब्रजरीतिचिन्तामणि	४०.००
१६-श्रीगोविन्दवृन्दावनम्	३०.००
१७-श्रीकृष्णभक्तिरत्नप्रकाश	५०.००
१८-श्रीहरेकृष्णमहामन्त्र	५.००
१९-श्रीहरिभक्तिसारसंग्रह	५०.००
२०-धर्मसंग्रह	५०.००
२१-श्रीचैतन्यसूक्तिसुधाकर	१०.००
२२-श्रीनामामृतसमुद्र	१०.००
२३-सनत्कुमारसंहिता	२०.००
२४-श्रुतिस्तुति व्याख्या	१००.००
२५-रासप्रबन्ध	३०.००
२६-दिनचन्द्रिका	२०.००
२७-श्रीसाधनदीपिका	६०.००
२८-स्वकीयात्वनिरासविचारः, परकीयात्वनिरूपणम्	१००.००
२९-श्रीराधारससुधानिधि (मूल)	३०.००
३०-श्रीराधारससुधानिधि (सानुवाद)	११०.००
३१-श्रीचैतन्यचन्द्रामृतम्	३०.००
३२-श्रीगौरांग चन्द्रोदय	३०.००
३३-श्रीब्रह्मसंहिता	५०.००
३४-भक्तिचन्द्रिका	३०.००
३५-प्रमेयरत्नावली एवं नवरत्न	५०.००
३६-वेदान्तस्यमन्तक	४०.००
३७-तत्वसन्दर्भः	१००.००
३८-भगवत्सन्दर्भः	१५०.००
३९-परमात्मसन्दर्भः	२००.००
४०-कृष्णसन्दर्भः	२५०.००
४१-भक्तिसन्दर्भः	३००.००
४२-प्रीतिसन्दर्भः	३००.००

सद्ग्रन्थावली अनुक्रमणिका

क्रम. सद्ग्रन्थ	मूल्य
४३-दशःश्लोकी भाष्यम्	६०.००
४४-भक्तिरसामृतशेष	१००.००
४५-श्रीचैतन्यभागवत	२००.००
४६-श्रीचैतन्यचरितामृतमहाकाव्यम्	१५०.००
४७-श्रीचैतन्यमंगल	१५०.००
४८-श्रीगौरांगविरुदावली	४०.००
४६-श्रीकृष्णचैतन्यचरितामृत	१५०.००
५०-सत्संगम्	५०.००
५१-नित्यकृत्यप्रकरणम्	५०.००
५२-श्रीमद्भागवत प्रथम श्लोक	३०.००
५३-श्रीगायत्री व्याख्याविवृतिः	१०.००
५४-श्रीहरिनामामृत व्याकरणम्	२५०.००
५५-श्रीकृष्णजन्मतिथिविधिः	३०.००
५६-५७-५८-श्रीहरिभक्तिविलासः	६००.००
५६-काव्यकौस्तुभः	१००.००
६०-श्रीचैतन्यचरितामृत	२५०.००
६१-अलंकारकौस्तुभ	२५०.००
६२-श्रीगौरांगलीलामृतम्	३०.००
६३-शिक्षाष्टकम्	१०.००
६४-संक्षेप श्रीहरिनामामृत व्याकरणम्	८०.००
६५-प्रयुक्ताख्यात मंजरी	२०.००
६६-छन्दो कौस्तुभ	५०.००
६७-हिन्दुधर्मरहस्यम् वा सर्वधर्मसमन्वयः	५०.००
६८-साहित्य-कौमुदी	१५०.००

बंगाक्षर में मुद्रित ग्रन्थ

१-श्रीबलभद्रसहस्रनाम स्तोत्रम्	१०.००
२-दुर्लभसार	१०.००
३-साधकोल्लास	५०.००
४-भक्तिचन्द्रिका	४०.००
५-श्रीराधारससुधानिधि (मूल)	२०.००
६-श्रीराधारससुधानिधि (सानुवाद)	३०.००
७-श्रीभगवद्भक्तिसार समुच्चय	३०.००
८-भक्तिसर्वस्व	३०.००
६-मनःशिक्षा	३०.००
१०-पदावली	३०.००
११-साधनामृतचन्द्रिका	४०.००
१२-भक्तिसंगीतलहरी	२०.००

अंग्रेजी भाषा में मुद्रित ग्रन्थ

१-पद्यावली (Padyavali)	२००.००

गोशाला

आश्रम के अग्रभाग में एक बृहद् गोशाला है, जिसमें गोवंश की संख्या लगभग 201 है। यहाँ पर गाय की सेवा गाय के अनुकूल रूप में ही की जाती है न कि व्यवसाय की दृष्टि से। गाय श्रीकृष्णजी की भी पूज्य हैं जो कि उनकी भौमलीला से विदित है, उनको आदर्श मानकर ही यहाँ पर गाय की सेव्यरूप में सेवा की जाती है। गो-सेवा के लिए 'श्रीहरिदास शास्त्री गऊ संस्थान' की स्थापना की गयी है तथा तेहरा ग्राम श्रीवृन्दावन के निकट 11 एकड़ भूमि भी खरीदी गयी है, वहाँ पर एक और नवीन बृहद् गोशाला है। वृद्धावस्था में भी महाराजश्री स्वयं गो-सेवा करते हैं। इस आश्रम का वातावरण प्राचीय समय के ऋषिकुलों जैसा है। आश्रम में श्री श्री गौरगदाधर ग्रन्थागारम् नामक एक विराट ग्रन्थागार भी है जिसमें प्रचुर प्राचीन मुद्रित एवं हस्तलिखित ग्रन्थ उपलब्ध हैं। आश्रम की एक 'प्रेस' भी है जिसका नाम 'श्रीगदाधर गौरहरि प्रेस' है। इस प्रेस से अभी तक लगभग 82 सद्ग्रन्थों का संस्कृत, हिन्दी, बँगला एवं अंग्रेजी भाषा में प्रकाशन हो चुका है।

मुद्रक :

श्रीगदाधर गौरहरि प्रेस

(श्रीहरिदास निवास)

प्राचीन कालीदह, वृन्दावन (मथुरा)

फोन : 0565-3202322, 3202325